शास्त्री-द्वितीय वर्ष

रघुवंशम

Date __/__/__

प्रश्न:- छायाविनीताध्वपरिश्रमेषु भूयिष्ठसम्भाव्यफलेष्वमीषु ।
तस्यातिथीनामधुनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु ॥

उत्तर- अन्वय: – अधुना तस्य अतिथीनां सपर्या छायाविनीताध्वपरिश्रमेषु भूयिष्ठ सम्भाव्यफलेषु अमीषु पादपेषु सुपुत्रेषु इव स्थिता ।

सञ्जी० – अधुनाऽस्मिन्काले तस्य शरभङ्गस्य सम्बन्धिन्यतिथीनांतिथीनां सपर्याऽतिथिपूजा । 'पूजा नमस्यापचिति: सपर्यार्चार्हणा: समा:' इत्यमर: । छायाभि विनीतोऽपनीतोऽध्वपरिश्रमो यस्तेषु भूयिष्ठानि बहुतमानि सम्भाव्यानि श्लाघ्यानि फलानि येषां तेष्वमीषु पादपेष्वाश्रमवृक्षेषु सुपुत्रेष्विव स्थिता तत्पुत्रैरिव पादपैरनुष्ठियत इत्यर्थ: ।

व्याख्या – हे प्रिये । अधुना = साम्प्रतम् । तस्य = शरभङ्गमुने । अतिथीनाम् = आगन्तुकानाम् । सपर्या = पूजा, अतिथिपूजा । छायाविनीताध्वपरिश्रमेषु – छायाऽपनीतमार्गायासेषु । भूयिष्ठसम्भाव्यफलेषु = बहुतमश्लाघ्यफलेषु । अमीषु = एतेषु । पादपेषु = तपोवनतरुषु वृक्षेषु । सुपुत्रेष्विव = आज्ञाकारिषु उत्तमात्मजेष्विव । स्थिता = विद्यमाना अस्तीति शेष: ।

समास: – अध्वन: परिश्रम: अध्वपरिश्रम:, छायायां अध्वपरिश्रमो येस्ते छायाविनीताध्वपरिश्रमा:, तेषु छायाविनीताध्वपरिश्रमेषु । भूयिष्ठानि सम्भाव्यानि फलानि येषु ते भूयिष्ठसम्भाव्यफला:, तेषु भूयिष्ठसम्भाव्यफलेषु । पादै: पिबन्तीति:, तेषु पादपेषु ।

शेष आगे –

Page No.

शेष पृष्ठ

Date __/__/__

भावार्थ - यथा म्रियमाण: पुण्यात्मा मनुष्य: स्वीयेषु सत्पुत्रेषु अतिथिसत्कारमदिभारं प्रदाय स्वर्गं गच्छन्ति, तथैव दिव्यलोकं जिगमिषु शरभङ्गमुनि: स्वाश्रमवृक्षेषु अतिथिसत्कारं प्रदत्तवान्। तदनुसारमेते तदाश्रमतरव: छायया मार्गश्रमस्यापनयनद्वारा स्वादु फलैश्च सन्तर्पणेन अभ्यागतानतिथिन् सततं सत्कुर्वन्ति, यतो हि शास्त्रानुसारं पञ्चमहायज्ञेषु अतिथिसत्कारोऽप्येको यज्ञ: स्वीकृतोऽस्ति तथा हि भगवान् मनु: -

'अध्यापनं ब्रह्मयज्ञ: पितृयज्ञस्तु तर्पणम्।
होमो दैव: बलिर्भौतो नृयज्ञोऽतिथि पूजनम्'॥

भावार्थ - जिस प्रकार सुपुत्र अपने पिता के धर्म का पालन करते हैं, उसी प्रकार अतिथि सेवा का कार्य शरभंग ऋषि के बदले ये आश्रम के वृक्ष करते हैं, जिनकी सघन छाया में बैठकर पथिक अपनी थकावट दूर करते हैं और जिनमें बड़े मीठे-मीठे फल भी लगते हैं - अर्थात अतिथियों के आने पर शरभंग मुनि के पुत्रों के समान ये वृक्ष छाया एवं मधुर फलों से अतिथियों का सत्कार करते हैं।

Renu Devi
30/09/20

राधा उमाकान्त संस्कृत महाविद्यालय
सुखसैना पूर्णियाँ

Page No.

शास्त्री प्रथम खण्ड

अभिज्ञानशाकुन्तलम

Date __/__/__

मुक्तेषु रश्मिषु निरायतपूर्वकाया
निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः ।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्याः ॥

उत्तरम् – प्रसंग — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञान शाकुन्तलम नाट्यशास्त्रस्य चतुर्थोऽङ्कात् उद्धृतोऽस्ति ।

व्याख्या – इति समदेशवर्ति तस्य = समतल भूमिस्थस्य ते = तव दुरासदः = दुष्प्रापः न भवति ।

राजा – राजा कथयति यत्, तेन = तस्मात्, कारणात् हि = निश्चयेन अभीषवः = प्रगृहाः मुच्यन्ताम = शिथिलीक्रियन्ताम् । अश्वान धावय मृगं हन्मीत्यर्थः ।

सूतः – सूतः = सारथि कथयति यत्, यथा = उचितम, आयुष्मान = भवान् आज्ञापयति = आदिशति तथा करोमि, अश्वान् धावयामीत्यर्थः । रथस्य = स्यन्दनस्य वेगं = गतिं निरूप्य = नाटयित्वा, अभिनीय आयुष्मान । पश्य पश्य = ~~अवलोकय~~ अवलोकय, सम्भ्रमे द्विरुक्तिः ।

अन्वयः – रश्मिषु मुक्तेषु निरायतपूर्वकायाः निष्कम्पचामरशिखाः निभृतोर्ध्वकर्णाः आत्मोद्धतैः अपि रजोभिः अलङ्घनीयाः अमी रथ्याः मृगजवाक्षमया इव धावन्ति ।

मुक्तेषु इति – रश्मिषु = प्रग्रहेषु मुक्तेषु = शिथिलीकृतेषु सत्सु निरायतपूर्वकायाः नितरां - आयतो

शेष आगे

शेष पृष्ठ

Saathi

Date ___/___/______

विस्तृत निरायतः पूर्वमग्रकायस्यौति पूर्वकाय निरायत स्थाकर्षविगात पूर्वकायो येषां ते निरायतपूर्वकायाः = विस्तारितस्कन्धमुखपादप्रदेशाः । निष्कम्पचामरशिखाः चामराः = कर्णयोः भूषणार्थं दत्तानां चमरी पुच्छानां शिखाः = अग्राणि इति चामरशिखाः

Renu Devi
30/09/20
राधा उमाकान्त संस्कृत महाविद्यालय
~~सुखसेना~~ सुखसेना पूर्णियाँ

उपशास्त्री प्रथमवर्ष

काव्यदीपिका

Saathi

Date ___/___/___

प्रश्नः वक्तृबोद्धव्यवाक्यानां काकोश्चेष्टाऽऽदिकस्य च ।
वैशिष्ट्यादन्यमर्थं या बोधयेत् सार्थसम्भवा ॥

उत्तरम्- यस्याः कृते = आश्रय लक्षणा = लक्षणाख्या वृत्तिः उपास्यते = स्वीक्रियते तत्तु व्यञ्जनावृत्तेः प्रयोजनं भवति । यया वृत्त्या पुनः तत् प्रयोजनं प्रत्याय्यते = बोध्यते सा लक्षणामूला व्यञ्जना । यथा गङ्गायां घोष इत्यत्र सङ्केतार्थमात्रबोधिकाया अभिधाया अन्वयसङ्गतये तदर्थं बोधयित्वा विरताया लक्षणायाः शीतत्वाभिव्यबोधने नास्ति शक्तिः व्यञ्जनयैव शक्यं तद्बोधनम् । न च लक्षणया प्रयोजनं लक्ष्यं तस्याः प्रयोजनमुद्दिश्य प्रवृत्तेः प्रयोजनस्य पुनर्लक्षणतया अनवस्थापातात् । तथा चोक्तवाक्ये गङ्गापदस्य प्रवाहरूपोऽर्थोऽभिधया बोध्यते प्रवाहे च घोषाधारताऽनुपपन्नेति कृत्वा गङ्गापदस्य तटरूपोऽर्थः लक्षणया बोध्यते एवं च वाच्यार्थं लक्ष्यार्थं च बोधयित्वा विरतायामभिधालक्षणारूपायां वृत्तौ लक्षणप्रयोजनभूतां शीतत्वपावनत्वातिशयप्रतीतिं व्यञ्जनाख्यावृत्तिं जनयतीत्यर्थः शाब्दीं व्यञ्जनामभिधायार्थीमाह - वक्तृबोद्धव्येति । वक्ता = प्रतिपादयिता, बोद्धा = श्रोता, वाक्यं = प्रतिपादयिषितोऽर्थः एषां वक्तृबोद्धव्यवाक्यानां काकोः = शोकभीत्यादिजनितध्वनिविकारस्य चेष्टादिकस्य = हस्तचालनप्रकारदेशादेः वैशिष्ट्यात् = विशेषयोगात् या वृत्तिः अन्यं = अपरम् वाच्यादिभिन्नं लक्ष्यम् अर्थं बोधयेत् = अन्यार्थविषयकं ज्ञानं जनयेत् सा अर्थसम्भवा = अर्थाश्रिता अर्थव्यञ्जनेति कारिकार्थः ।

Renu Devi
राध्या उमाकान्त सं० महावि० 30/09/20
सुरसेना पूर्णिया